# Shri Hanumat Panchashat

# શ્રીહનૂમત્પઞ્ચાશત્

## Document Information

Text title : Hanumat Panchashat

File name : hanUmatpanchAshat.itx

Category : hanumaana, panchAshata

Location : doc_hanumaana

Latest update : September 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 3, 2023

*sanskritdocuments.org*

# શ્રીહનૂમત્પઞ્ચાશત્

(સ્રગ્ધરા છન્દ)

શ્રીમાન્ ધીમાન્ હનૂમાનસમસમધિકઃ કીર્તિમાન્ ભક્તિમાન્ શ્રી-
રામે શ્રીરામ રામેત્યનવરતરતો નામસઙ્કીર્તને યઃ ।
સીમાતીતોઽભિરામો વિલસતિ મહિમા યસ્ય રોમાઞ્ચકારી
ક્ષેમસ્તોમં સ કામં ગમયતુ નમતઃ શ્રી સમીરાત્મજો નઃ ॥ ૧॥

ઓમિત્યુક્ત્વા નમોઽતસ્તદનુ ભગવતેઽપ્યાઞ્જનેયાય ચાથ
શબ્દં ચાન્તે ચતુર્થ્યાં “સ મહદિતિ બલં યસ્ય” જાતં સમસ્ય ।
ઇત્થં સૃષ્ટં તમષ્ટાદશપરિગણિતૈરક્ષરૈરક્ષહન્તુઃ
મન્ત્રં સર્વેષ્ટસિદ્ધ્યૈ હુતવહદયિતાચૂડમામ્રેડયામઃ ॥ ૨॥

વીરો યઃ કેસરીતિ ત્રિભુવનવિદિતસ્તસ્ય રાજ્ઞોઽઞ્જનાયાં
પત્ન્યાં શ્રીરામહેતોસ્સમજનિ તનયો મારુતસ્યૌરસો યઃ ।
સ્વાદીયસ્સદ્યદીયૈઃ પ્રભુચરિતમહો ભાતિ કૃત્યૈર્વિચિત્રૈઃ
સદ્યો નુદ્યાદવદ્યં કલિબલકલિતં કેસરિક્ષેત્રજો નઃ ॥ ૩॥

અત્રસ્તો જાતમાત્રઃ ફલમિતિ કલયન્ મિત્રમાહર્તુકામઃ
પુત્રો વાયોઃ પુરાઽયં વિયતિ કૃતરયઃ પુપ્લુવે યઃ પ્લવઙ્ગઃ ।
સ ત્રાયાત્ વૃત્રજેત્રા તદનુકૃતહનુર્વજ્રપાતેન ડિમ્ભઃ
પિત્રા સંસ્તભ્ય લોકાન્ વરમમરગણાલ્લમ્ભિતો જૃમ્ભિતેન ॥ ૪॥

એકસ્સન્નદ્વિતીયઃ શ્રુતિષુ તિસૃષુ યઃ પણ્ડિતશ્ચાતુરાસ્ય-
પ્રીત્યા પઞ્ચત્વહીનસ્સ પવનતનયઃ ષડ્ગુણસ્સપ્તસપ્તેઃ ।
શિષ્યોઽષ્ટાઙ્ગી નવવ્યાકરણચણમતી રામભક્તઃ પરં નઃ
દિશ્યાદાયુસ્સુદીર્ઘં દશલપનરિપુર્ભાગ્યમારોગ્યભોગ્યમ્ ॥ ૫॥

સુગ્રીવેણાલોક્યાગ્રજભયચકિતેનાત્મના પઞ્ચમેન
તૂણીબાણાસનેદ્ધૌ વિપિનમુપગતૌ રામરામાનુજૌ તૌ ।
શઙ્કાતઙ્કાકુલેન પ્રણિધિરિવ તયોરન્તિકં પ્રેષિતો યઃ

શઙ્કાતઙ્કાપનોદં કલયતુ કુશલો ભિક્ષુવેષો હનૂમાન્ ॥ ૬॥

ગત્વા સૌમિત્રિરામાવથ વિપિનપથં તૌ કથં વા કિમર્થં
આયાતાવિત્યનેકેરયમમરગિરા મધ્યમેન સ્વરેણ ।
સમ્યક્ શબ્દપ્રયોગોચ્ચરણવિધિયુતેનાદ્રુતં ચાવિલમ્બં
પ્રશ્નૈઃ પૃષ્ટૈઃ પ્રતુષ્ટં રઘુપતિમતનોદ્વાગ્મિતાં યસ્સ દત્તામ્ ॥ ૭॥

કઞ્જાક્ષૌ રઞ્જયન્તૌ વનભુવમભિતો મઞ્જુતાં વ્યઞ્જયન્તૌ
સઞ્જાનન્ દેવતુલ્યૌ રઘુકુલતિલકૌ પ્રાઞ્જલિઃ પ્રાઞ્જલોક્તિઃ ।
યુઞ્જાનસ્તેન મૈત્રી વ્યધિત રવિસુતેનાઞ્જસા સઞ્જયાય
યુઞ્જન્ સઞ્જાયતાં નસ્સહૃદયસુહૃદો રઞ્જનાયાઞ્જનેયઃ ॥ ૮॥

વાલી કાલસ્ય યાતો વશમિતિ મહતો નૈવ શોકસ્ય કાલઃ
પુત્રો રાજ્યેઽભિષેચ્યસ્તવ ઝટિતિ તતો મા ચિરં રાજ્ઞિ રોદીઃ ।
તારામ્મેવં વચોભિર્મૃદુમધુરપદૈસ્સાન્ત્વયામાસ યોઽસૌ
કર્તવ્યં દુઃખમધ્યે કપિરિહ કૃપયા તારયેત્ કારયન્નઃ ॥ ૯॥

વર્ષાન્તે વાનરાણાં દિશિ દિશિ પૃતનાં મૈથિલીમાર્ગણાર્થં
મર્ષી સ્યાઃ પ્રેષયેયેત્યથ સમયમિમં રામચન્દ્રેણ કૃત્વા ।
હર્ષી વિસ્મૃત્ય ભોગે લગતિ રવિજ ઇત્યસ્ય બુદ્ધિં સ્ખલન્તીં
કર્ષન્ સાચિવ્યકારી કલયતુ હનુમાન્ નસ્સ મોહવ્યપોહમ્ ॥ ૧૦॥

વિશ્લેષાં શેવધિસ્સન્ દશવદનવધં કર્તુમત્રાવતીર્ણઃ
વિશ્વાસં વાયુપુત્રે નયવિનયવતિ પ્રાપ્ય રામોઽઙ્ગુલીયમ્ ।
વિશ્વાસાય પ્રિયાયાઃ રવિસુતવચસા સોઽર્પયામાસ યસ્મિન્
નિશ્વાસે નિર્ગમિષ્યત્યપિ ભવતુ સ નઃ કશ્ચનાશ્વાસહેતુઃ ॥ ૧૧॥

સીતાન્વેષાય વિષ્ટાન્ બિલમથ તિમિરેણાવૃતં વિન્ધ્યશૈલે
ભીતાન્નિષ્ક્રાન્ત્યશક્તાન્ સદયમનુચરાંસ્તારયિષ્યન્ ગુહાયાઃ ।
સૂનુર્વાયોર્વચોભિર્મયદુહિતૃસખીં સૂનૃતૈર્યોઽન્વનૈષીત્
જાતેભ્યસ્સઙ્કટેભ્યો ભવતુ સ ભગવાન્ યાચિતો મોચનાય ॥ ૧૨॥

સુગ્રીવાજ્ઞા વિરોધં કલયતિયુવરાજ્યઙ્ગદે વાલિપુત્રે
તેનાનીકે કવીનાં સપદિ વિચલિતે યસ્સ્વયં વાયુપુત્રઃ ।
સામ્ના ભેદેન રામાનુજવિશિખભિયા ભેદયિત્વાથ ધર્મ્યે
કર્તવ્યેઽચૂચુદત્તન્ દિશતુ સ હનુમાન્ નૈપુણં રાજતન્ત્રે ॥ ૧૩॥

તુઙ્ગં માહેન્દ્રશૃઙ્ગં ઘનવનશિશિરં ધાતુભિર્નૈકરઙ્ગં
    ત્વઙ્ગત્પાદાભિઘાતૈઃ શ્વસિતમિવ દધન્નિષ્પતદ્ભિર્ભુજઙ્ગૈઃ ।
ભઙ્ગાદ્ ગ્રાવ્ણાં ક્ષરદ્ભિર્વમદિવ રુધિરં ધાતુરાગૈર્વિધાય
    પિઙ્ગાક્ષો જૃમ્ભમાણો જલનિધિતરણે તારણં નસ્તનોતુ ॥ ૧૪॥

ધ્યાત્વા શ્રીરામપાદૌ ક્ષણમચલવદાસ્થાય માહેન્દ્રમૌલૌ
    બદ્ધ્વા રામાઙ્ગુલીયં દૃઢમથ વસને પ્રસ્થિતો વાયુસૂનુઃ ।
પારાવારસ્ય પારં પરમુરુતરસા યાતુકામસ્સકામં
    પારાવારસ્ય પારં ગમયતુ નમતો ઘોરસંસારનામ્નઃ ॥ ૧૫॥

આદ્રેસ્તદ્રૂપધારી ગગનમુપગતોઽહ્નાય તીર્ત્વા સમુદ્રં
    ક્ષુદ્રાકારઃ પ્રવિષ્ટો દશમુખનગરીં રૌદ્રરક્ષઃપ્રતિષ્ઠમ્ ।
નિદ્રાહીનાં નિરન્નાં પતિવિરહકૃશાં રામભદ્રસ્ય પત્નીં
    મુદ્રાદાનપ્રતીતામતનુત હનુમાન્ યસ્સ ભદ્રાણિ દિશ્યાત્ ॥ ૧૬॥

ગત્યોત્પત્યાતિવર્ત્ય સ્વપિતરમપિ ચરદ્ વ્યોમ્નિ વાયોરપત્યં
    પ્રીત્યા દૃષ્ટં પ્લવઙ્ગૈર્જલનિધિતરણે ચારણૈશ્ચ પ્રણત્યા ।
ભીત્યા દૈત્યૈર્વિનીત્યા સુરવરનિવહૈર્યોગિભિશ્ચ પ્રસત્ત્યા
    સ્તુત્યા તન્નઃ પ્રસન્નં કુભિષગવિષયં શાતયેદ્વાતરોગમ્ ॥ ૧૭॥

તાતસ્યાથાધમર્ણં ગિરિવરમુરસાઽઽહત્ય મૈનાકમબ્ધૌ
    છાયાગ્રાહેણ વિઘ્નં પથિ સ વિદધતીં સિંહિકાં સૂદયિત્વા ।
નાગાનાં પ્રીણયિત્વા સવિનતિ સુરસાં માતરં વાતજાતઃ
    પારં વાતોઽન્તરાયાન્ પથિ સ નિપતિતાનન્તરા હન્તુ નન્તુઃ ॥ ૧૮॥

પુત્રો વાયોરમિત્રો મમ તનયમયં પીડયામાસ રાહું
    તત્રાકાશે જિઘૃક્ષુઃ ફલમિતિ તરણિં જાતમાત્રઃ પ્લવઙ્ગઃ ।
સત્રાસો યેન પુત્રો મમ કૃત ઇતિ તાં સિંહિકાં સ્વં જિઘાંસું
    ચિત્રેણૈવ ક્રમેણાક્ષપયત સ તથાઽસ્મદ્વિપક્ષં ક્ષિણોતુ ॥ ૧૯॥

લઙ્કાસંરક્ષિણી સા રજનિચરપતેઃ રાજધાન્યેવ મૂર્તા-
    મૂર્ચ્છાકારિપ્રહારં કમપિ વિતરતા નિર્જિતા યેન સદ્યઃ ।
લઙ્કામાસન્નનાશાં ફલિતમભિહિતં બ્રહ્મણા પ્રાહ યસ્મૈ
    ભઞ્જાત્ પ્રાભઞ્જનિર્નઃ સકલમવિકલં વિદ્વિષાં દુર્ગવર્ગમ્ ॥ ૨૦॥

રામાં રામસ્ય ચિન્વન્નિશિચરનગરેસદ્મનસ્સદ્મ ગત્વા
    વામાસ્તા રાવણેન પ્રસભમપહૃતાઃ સ્થાપિતશ્ચાવરોધે ।

શ્યામાયામે તૃતીયે વિગલિતવસનાઃ કામિનીરપ્યવેક્ષ્ય
કામં કામસ્ય નાયાદ્વશમનિલસુતો નસ્સ પાયાદપાયાત્ ॥ ૨૧॥

યુદ્ધે ક્રુદ્ધેન જિત્વા બલજિતમથ તં રાવણેનાપહૃત્ય
બદ્ધાનીતાવરુદ્ધાસ્સુરપુરવનિતા વીક્ષ્ય શુદ્ધાન્તરઙ્ગે ।
અદ્ધા શુદ્ધાન્તરઙ્ગઃ ક ઇહ સ ભવિતાન્યત્ર ગાઙ્ગેયભીષ્માત્
બુદ્ધિશ્રેષ્ઠાઞ્જનેયાદુત કથિત ઇતિ ત્રાયતાં વાયુપુત્રઃ ॥ ૨૨॥

હીના રામેણ સીતામુપવસનકૃશાં શિંશપાવૃક્ષમૂલે
દીનાં વીક્ષ્યૈકવેણીં મલિનપટધરાં તર્જિતાં રાક્ષસીભિઃ ।
લીનઃ પર્ણેષુ રામં પ્રભુમથ મનસા તં પ્રશંસન્ જગામ
યો નઃ શ્રીતત્ત્વવેત્તા પ્રદિશતુ પરમં તસ્ય તત્ત્વસ્ય બોધમ્ ॥ ૨૩॥

માસૌ દ્વાવેવ કૃત્વા સમયમપગતે રાવણે તર્જયિત્વા
ત્રાસં યાઽઽસાદ્ય વેણ્યુદ્ગ્રથનકરણતો મૈથિલી મર્તુકામા ।
પ્રાણે પ્રત્યાયિતાઽભૂત્ પ્રભુચરિતમથોદ્ગીય વાયોસ્સુતેન
પ્રીતિસ્ફીતઃ કપિસ્સ પ્રણિપતનપરાત્ પ્રીણયન્ પ્રાણયેન્નઃ ॥ ૨૪॥

રાક્ષસ્યા સ્વપ્નદૃષ્ટં રઘુપતિવિજયં વર્ણયન્ત્યા પ્રસન્ના
તાભિર્નોક્તાઽપિ સીતા ભવ શરણમિહેત્યાસ તાસાં તથા સા ।
અવ્યાજેનાનુકમ્પામપચરણપરેઽપ્યાદધાનામતોઽમ્બાં
વ્યાજાપેક્ષં સ જાનન્ પ્રભુમતિશયિતાં પાતુ નઃ પાવમાનિઃ ॥ ૨૫॥

રામસ્સૌમિત્રિણા યે પરમથ વિરહાત્ ક્વ ક્વ યાતશ્ચ કિં કિં
ચક્રે સુગ્રીવસખ્યં કથમગમદિતિ બ્રૂહિ સર્વં કપે ત્વમ્ ।
એવં ભૂયશ્ચ ભૂયો જનકતનયયા ચોદ્યમાનેન યેન
સંશ્રાવ્યાઽઽશ્વાસિતાઽભૂદનયમપનયત્વાઞ્જનેયસ્સ્વયં નઃ ॥ ૨૬॥

મત્તુલ્યા મદ્વિશિષ્ટા અપિ બહુકપયઃ સન્તિ સૈન્યે કપીનાં
મત્તો ન્યૂનો ન કશ્ચિત્તવ પતિરિહ તૈ રાવણં જેષ્યતીતિ ।
પ્રોચ્ય પ્રત્યાયયિષ્યન્નિવ ચ રિપુબલં તત્સમક્ષં હનિષ્યન્
રક્ષોઽશીતિં તમક્ષં સચિવસુતગણં યોઽવધીત્ સોઽવતાન્નઃ ॥ ૨૭॥

અક્ષં રુક્ષં સમક્ષં ક્ષતિકરવિશિખાન્ લક્ષયિત્વા ક્ષિપન્તં
વક્ષસ્યક્ષ્ણોઃ ક્ષણાય ક્ષયમયમનયન્ સક્ષમસ્સ ક્ષમોઽપિ ।
રક્ષો દક્ષં વિપક્ષક્ષપણ ઇદમુપેક્ષ્યં ન હીત્યક્ષિણોદ્યઃ
ક્ષિપ્રં ક્ષિપ્ત્વાન્તરિક્ષાત્ ક્ષિતિમધિ હનુમાન્ વિક્ષતાદ્રક્ષતાન્તઃ ॥ ૨૮॥

ઇચ્છન્ બ્રહ્માસ્ત્રબન્ધં ત્રુટયિતુમધુના રાવણેઃ પારયામિ
    ગચ્છન્નેવાગતોઽહં કિમપિ તવ હિતં રાવણં વ્યાજિહીર્ષુઃ ।
સ્વચ્છન્દં સ્વચ્છમેવં તમયમભિદધત્ પુચ્છપીઠાધિરૂઢઃ
    પુચ્છેનેચ્છાવિહારઃ પ્રહરતુ હનુમાન્ ક્ષાત્રવાન્ શાત્રવાત્રઃ ॥ ૨૯॥

વાલે તૈલેન સિક્તે પિચુતટવલિતે દીપિતે યાતુધાને
    જ્વાલામાલાકુલોઽગ્નિર્ન જનકસુતયા શાપિતો યં તતાપ ।
લઙ્કાયાં રાક્ષસેન્દ્રાનુજગૃહરહિતં યેન દગ્ધં સમસ્તં
    દિગ્ધાં સ્નિગ્ધો વિદગ્ધઃ પવનજ ઇહ નો જ્ઞાનદુગ્ધેન મુગ્ધાન્ ॥ ૩૦॥

લઙ્કાં લાઙ્ગૂલદગ્ધાં નિશિચરરુદિતૈરાકુલામાકલય્ય
    પ્રત્યાવૃત્યામ્બુરાશેસ્તતમધિ હનુમાન્ વાનરાણામનીકમ્ ।
નિષ્પન્દં જાતકૌતૂહલમવહિતધિ શ્રાવયામાસ સર્વા
    આમૂલાત્ સ્વાં કથાં યઃ પ્રદિશતુ સ કથાકારપારીણતાં નઃ ॥ ૩૧॥

દૃષ્ટા સીતેતિ સા ત્વામિદમવદદિતિ શ્રોત્રપીયૂષમુક્ત્વા
    રામાત્ સર્વસ્વભૂતં રઘુકુલતિલકાદ્યઃ પરિષ્વઙ્ગમાપ ।
વિક્રાન્તં યં સમર્થં કપિમતિમુદિતા મૈથિલી પ્રાજ્ઞમૂચે
    શૃણ્વન્ રામાયણં યો વિચરતિ ભુવનેઽદ્યાપિ સ ત્રાયતાં નઃ ॥ ૩૨॥

યઃ શત્રોઃ રાવણસ્ય સ્વયમયમનુજોઽદેશકાલાગતોઽત્ર
    નિગ્રાહ્યો ગ્રાહ્યતાં ન વ્રજતિ કથમપીતીતરેષૂચિવત્સુ ।
ધર્માત્મા દેશકાલાગત ઇતિ વચનૈર્હેતુમદ્ભિર્ય ઊચે
    ચિત્તં રામસ્ય જાનન્નવતુ સ હનુમાન્ ધર્મવિત્ કર્મભિર્નઃ ॥ ૩૩॥

કૈલાસં કમ્પયિત્વા વરમથ તપસા શમ્ભુમારાધ્ય લબ્ધ્વા
    બમ્ભોલિં જમ્ભશત્રોઃ શલભમિવ ન યો લક્ષતે વક્ષસિ સ્મ ।
મુષ્ટિં તસ્ય પ્રપાત્યોરસિ દશશિરસસ્તેન સદ્યોઽપનુદ્યાત્
    સાધુ ત્વં શ્લાઘનીયો રિપુરિતિ કથિતો મારુતિર્ભીરુતાં નઃ ॥ ૩૪॥

સાનીકં જાનકીશં રણભુવિ પતિતં મેઘનાદાસ્ત્રવિદ્ધં
    ગ્લાનિં ભૂયો ભજન્તં પતિતમવરજં વીક્ષ્ય સઞ્જીવયિષ્યન્ ।
યોનિં દિવ્યૌષધીનાં હિમગિરિશિખરં યસ્સ આનીતવાન્નો
    હાનિં દાત્રીં નિહન્યાત્ તનુરુજમગદઙ્કારભૂતો હનૂમાન્ ॥ ૩૫॥

વૈકુણ્ઠે શેષનામા ભુજગપરિવૃઢઃ શ્રીપતેર્ધૂર્વહો યો

જાતો રામાવતારે દશરથતનયઃ પ્રાપ્ય રામાનુજત્વમ્ ।
ધૃત્વા શક્ત્યાઽઽહતં તં યુધિ દશશિરસા દુર્વહં ધૂર્વહત્વં
વ્યાનગ્યો વાયુસૂનુર્લઘુમિહ વહતાલ્લીલયાઽસ્મદ્ધુરં સઃ ॥ ૩૬॥

જમ્ભારાતેર્વિજેતુઃ બલમથ વિદલન્ રક્ષસાં દમ્ભભેત્તા
ડિમ્ભો વાયોર્યુધાયાં વિધૃતરઘુવરો યો નિકુમ્ભસ્ય હન્તા ।
અમ્ભોધિં લઙ્ઘયિત્વૌષધિમુપનમયન્ જૃમ્ભયાં સ્વાન્ બભૂવ
શમ્ભોરેવાવતારોઽયમિતિ નિગદિતસ્સ્તમ્ભયેત્ સમ્ભ્રમં નઃ ॥ ૩૭॥

માયાસીતાં સમક્ષં મઘવજિદસિના દારિતાં મારિતાઞ્ચ
પુત્રો નિધ્યાય વાયોરથ રઘુપતયે દુઃખમાખ્યાતુકામઃ ।
યો ગચ્છન્ રાક્ષસેન્દ્રાવરજવચનતો વઞ્ચિતં સ્વં વ્યજાનાત્
માયાવ્યાલીં સ ધુન્વન્ સ્વયમપનયતાજ્જાયમાનં ભયં નઃ ॥ ૩૮॥

મૈથિલ્યાઃ વિપ્રલમ્ભે રવિસુતવચસા પ્રેષયામાસ રામો
દૂતં વાતસ્ય જાતં સ જનકતનયાં જ્ઞાતુમમ્ભોધિપારમ્ ।
વ્યાપાદ્યાયોધને તં દશવદનમથ પ્રેષયન્નાશુ વાર્તાં
દેવ્યૈ દૂતં દધે યં વિતરતુ નમતામાર્તિહન્ત્રીં સ વાર્તામ્ ॥ ૩૯॥

સંસેવ્યાશોકવન્યાં રઘુપતિદયિતાં ક્રૂરવાગ્રાક્ષસીનાં
સંહારં યશ્ચિકીર્ષુસ્સદયમભિહિતસ્સેવિકાસ્સ્વામ્યધીનાઃ ।
સંરક્ષન્ત્યસ્તદાજ્ઞામદધત યદિ તત્ કોઽપરાધોઽત્ર તાસાં
સંહાર્યા નેતિ દેવ્યા કલયતુ સ દયાં નન્તૃષુ ક્ષાન્તમન્તુઃ ॥ ૪૦॥

આદિષ્ટો રાઘવેણ પ્રભુમપિ જટિલં સ્થણ્ડિલે સંવિશન્તં
નન્દિગ્રામે નિવિષ્ટં ભરતમભિગતો જ્યેષ્ઠભક્તૌ સુનિષ્ઠમ્ ।
દૃષ્ટ્વા શત્રુઘ્નજુષ્ટં રઘુપતિપદવીદત્તદૃષ્ટિં સ ભક્ત-
શ્રેષ્ઠં મેને મનીષી જનયતુ વિનયં મારુતિર્માનસે નઃ ॥ ૪૧॥

નાથસ્યાથાભિષેકે નયનસરસિજસ્યાદિતાનન્દવાષ્પં
જાનાના જાનકી યં પતિમતિમતનોદ્ધારદાનેન ધન્યમ્ ।
નિત્યં સૌમિત્રિસીતાસહિતરઘુવરં વન્દમાનો હનૂમાન્
વશ્યો દિશ્યાદવશ્યં દિશમથ વિદિશં વ્યશ્નુવાનં યશો નઃ ॥ ૪૨॥

મોક્ષં નાથપ્રસાદાત્ કરગતમતિ યો વ્યાક્ષિપંસ્તસ્ય ગાથાં
ગાયન્ શ ૃણ્વંસ્તદીયં ચરિતમયમવન્નાપદસ્તસ્ય ભક્તાન્ ।
તત્ત્વં સત્ત્વે સ્થિતેભ્યઃ પરમમુપદિશન્ સઞ્ચરન્ સમ્પ્રસદ્ય

સદ્યશ્શોકં સ નુદ્યાત્ સદયમનિલભૂરદ્ય લોકસ્ય સર્વમ્ ॥ ૪૩॥

યેન સ્પર્ધાં દધાનસ્સ્વયમનિલભુવા નારદો ભક્તિગાને
ગાનૈર્યસ્ય સ્વકીયાં દ્રવદુપલપુટે મજ્જિતાં વીક્ષ્ય વીણામ્ ।
ગાને નૂનં હનૂમાન્ પ્રથમ ઇતિ વદન્ લજ્જિતસ્તજ્જિતોઽભૂત્
માનાતીતં નતેભ્યો ન ઇહ સ તનુતાં ગાનવિજ્ઞાનદાનમ્ ॥ ૪૪॥

રામં સ્કન્ધાધિરૂઢં સમરભુવિચચારોદ્વહન્ વર્ષ્મણા યો
રામં સઙ્કીર્તયન્ યો વિહરતિ સતતં તં વહન્નેવ વાચા ।
રામં ધ્યાયન્ હનૂમાન્ વિચરતિ પરિતસ્તં વહન્ માનસેન
યાતઃ પાયાદપાયાદ્રઘુપતિમયતાં કાયવાઙ્માનસૈર્નઃ ॥ ૪૫॥

કૃષ્ણં વિષ્ણું સ જાનન્નપિ પરપુરુષં રાઘવાન્યાવતારં
રામાકારે દિદૃક્ષુઃ પુનરપિ પુરતો મારુતિસ્તેન યુદ્ધાન્ ।
વિભ્રાણે રાઘવસ્યાકૃતિમથ પતિતઃ પાદયોસ્તસ્ય દાસ્યં
સ્પષ્ટં વ્યાચષ્ટ યસ્સ્વં પ્રદિશતુ ભગવાન્ ભક્તિયોગં પરં નઃ ॥ ૪૬॥

પુષ્પં સૌગન્ધિકાખ્યં હિમગિરિવિપિને કૃષ્ણયા પ્રાર્થિતં યત્
ભ્રાત્રે ભીમાય તસ્મૈ તદવચયકૃતેઃ કામ્યયા ભ્રામ્યતે પ્રાક્ ।
સન્દર્શ્યાનુગ્રહં યો વ્યતરદપહરન્ સ્કન્ધયોરસ્ય ગન્ધં
ગન્ધં સંસારબન્ધપ્રદમપહરતાદ્ ગન્ધવાહાત્મજો નઃ ॥ ૪૭॥

પાર્થાદન્યત્ર દિવ્યાં દૃશમધિગમિતાત્ સઞ્જયાદ્વા પ્રબુદ્ધાત્
પાર્થસ્ય સ્યન્દનાગ્રે કપિકુલતિલકાન્મારુતેર્વા ધ્વજસ્થાત્ ।
સાર્થાં શ્રોતું હિ ગીતાં પરમપુરુષતો નિઃસૃતાં કઃ સમર્થઃ
સોઽર્થં ગીતોપદિષ્ટં કપિરુપદિશતાદસ્મદુજ્જીવનાર્થમ્ ॥ ૪૮॥

મધ્યે સિન્ધોર્ભવાબ્ધેરિવ પુરુષતનાવત્ર લઙ્કાખ્યપુર્યાં
સીતેવાપ્ય દ્વિપઞ્ચેન્દ્રિયયુતમનસાઽઽત્મા દશાસ્યેન બન્ધમ્ ।
આચાર્યાદેવ નન્દત્યનિલભુવ ઇવાકર્ણ્ય નાથસ્ય વાર્તાં
ઇત્યધ્યાત્મીયરામાયણમધિ મહિતો મારુતિસ્તાદ્ ગુરુર્નઃ ॥ ૪૯॥

લોકેઽદ્યાલોકહીને સપદિ કલિયુગે સંસ્કૃતે લુપ્યમાને
લોકો રામાયણં તત્ પઠતુ કથમિતિ પ્રાપ્ય ચિન્તાં પરાં તામ્ ।
હિન્દીરામાયણં યઃ કવિવરતુલસીદાસતો ભક્તિભાવૈઃ
પૂર્ણં તૂર્ણં પ્રણાય્ય વ્યવૃણુત સનૃણાં મારુતિશ્ચારુશીલઃ ॥ ૫૦॥

ક્રવ્યાદાનાં વિભાવ્યં પુરવરમખિલં હવ્યવાહેન દગ્ધ્વા
    દેવ્યાસ્સંસેવ્ય નવ્યામ્બુજસદૃશપદં સેવ્યમાશ્રાવ્ય ભૂયઃ ।
અભ્યર્ણે વર્ણયિષ્યંસ્તદથ રઘુપતેઃ તીર્ણવન્નર્ણવં ભોઃ
    તૂર્ણં કર્ણાવતીર્ણં કુરુ સુત મરુતસ્તોત્રમુદ્ગીર્ણમેતત્ ॥ ૫૧॥

ઉગ્રં વા શાન્તમૂર્તિં દશમુખનગરે વિષ્ટમઙ્ગુષ્ઠમાત્રં
    અગ્રે સૌમિત્રિસીતાસહિતરઘુપતેઃ તૂર્ણકર્ણાવતીર્ણમ્ । (પ્રશ્રયેણોપવિષ્ટમ્ ।)
વ્યગ્રા નિધ્યાય સદ્યો નિજહૃદિ બહુધા સિદ્ધિમાસેદિવાંસઃ
    સુગ્રાહ્યાં પાવમાનેરિતિ હિ નુતિમિમાદરેણાદદીરન્ ॥ ૫૨॥

એતાં પઞ્ચાશતં યઃ પઠતિ હનુમતઃ પ્રશ્રિતો યા શ‍ૃણોતિ
    ભક્ત્યા તાત્પર્યમસ્ય પ્રવચનવિધિના શ્રાવયત્યન્યભક્તાન્ ।
તદ્દૃષ્ટ્યા કુષ્ઠયક્ષ્મોદરહૃદયશિરઃકર્કટાદીન્ સ રોગાન્
    ઉલ્લઙ્ઘ્યોલ્લાઘભૂતસ્સુખમનુભવિતા શશ્વદુલ્લાસશીલઃ ॥ ૫૩॥

પ્રત્નં રત્નાકરસ્ય પ્રથિતમપિ યશો દુસ્તરત્વે નિરસ્ય
    યત્નૈર્યેન પ્રણીતૈરભવદવસિતો રામસીતાવિયોગઃ ।
રત્નં રામાયણાખ્યસ્રજ ઇતિ કવિભિર્મારુતેઃ કીર્તિતસ્ય
    યત્નસ્તસ્યાર્ચને નઃ ક્ષણમપિ વિહિતો નિત્યકલ્યાણહેતુઃ ॥ ૫૪॥

શ્રીરામો વિશ્વસર્ગસ્થિતિવિલયકરો યઃ પરબ્રહ્મભૂતઃ
    ભૂલોકેઽન્નાવતીર્ણો દશલપનવિલોપાય માયામનુષ્યઃ ।
ચક્રે સન્દર્શયા નઃ શુભચરિતમિષેણૈકમાદર્શમાર્ગં
    સ્તોત્રં દાસસ્ય તસ્યોદિતમનિલભુવસ્તન્મુદે તત્સવેદમ્ ॥ ૫૫॥

સુન્દરરાજગ્રથિતં સુન્દરકાણ્ડાધિનાયકસ્તોત્રમ્ ।
સુન્દરમેતત્ પઠિતા નન્દતિ મુક્તઃ પુમાન્ રોગાત્ ॥ ૫૬॥

ઇતિ શ્રીસુન્દરરાજકૃતા શ્રીહનૂમત્પઞ્ચાશત્ સમાપ્તા ॥

(રોગદુઃખનાશક શ્રીહનૂમત્પઞ્ચાશત્)

કવિ- શ્રી સુન્દરરાજઃ ।
માતા- શ્રીમતી વઞ્જુવલ્લી ।
પિતા આશુકવિસાર્વભૌમ વિલ્લૂર શ્રીનિવાસરાઘવાચાર્ય સ્વામી
જન્મ તિથિ-૧૩-૯-૧૯૩૬, જન્મસ્થાન-તઞ્જાવૂર જનપદાન્તર્ગત દેવનાથવિલાસ ગ્રામ
શિક્ષા-એમ.એ. (રસાયન શાસ્ત્ર), આઇ.એ.એસ (ઓડિશાં પ્રાપ્તાવકાશઃ)

(સ્રગ્ધરા છન્દ)

સ્રગ્ધરા મ્રૌ ભ્નૌ યૌ ય્ ત્રિઃસપ્તકાઃ (પિઙ્ગલ છન્દ શાસ્ત્ર, ૭/૨૫)

યસ્ય પાદે મગણ-રગણ-મગણ-નગણાસ્ત્રયશ્ચ યગણાઃ

(ऽऽऽ, ऽ॥અ, ऽ॥, ॥।, ॥અऽ, ॥અऽ, ॥અऽ)।

સપ્તસુ, સપ્તસુ, સપ્તસુ ચ યતિઃ । (ऽ - ગુરુ, । - લઘુ)

મગણ રગણ ભગણ નગણ યગણ યગણ યગણ

(ऽऽऽ) (ऽ॥અ) (ऽ॥) (॥।) (॥અऽ) (॥અऽ) (॥અऽ)

(સ્રગ્ધરા છન્દ લક્ષણશ્લોકઃ)

રેખા-ભ્રૂઃ શૂભ્રદ-ન્ત(૭)દ્યુતિ-હસિત-શર(૭)શ્ચન્દ્રિકાચા-રુમૂર્તિ(૭)-

માંધિન્મા-તઙ્ગલી-લા(૭)ગતિ-રતિવિ-પુલા(૭)ભો-ગતુઙ્ગ-સ્તની યા(૭) ।

રમ્ભાસ્ત-મ્ભોપમો-રૂ(૭)રલિ-મલિન-ઘન(૭)સ્નિ-ગ્ધધમ્મિ-લ્લહસ્તા(૭)

બિમ્બોષ્ઠી રક્તક-ણ્ઠી(૭)દિશ-તુ રતિ-સુખં(૭)સ્ર-ગ્ધરા સુ-ન્દરીયમ્(૭) ॥

---

*Shri Hanumat Panchashat*

pdf was typeset on September 3, 2023

Please send corrections to *sanskrit@cheerful.com*